# shrI mahAsarasvatI sahasranAma stotram

# શ્રીમહાસરસ્વતીસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : mahaasarasvatI sahasranAma stotram 1

File name : sarasvatisahasra.itx

Category : sahasranAma, devii, sarasvatI, stotra, devI

Location : doc_devii

Author : Traditional

Proofread by : Kirk Wortman kirkwort at hotmail.com Corrected based on the booklet

Description-comments : See corresponding nAmAvalI

Latest update : August 28, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીમહાસરસ્વતીસહસ્રનામસ્તોત્રમ્

॥ શ્રી મહાસરસ્વતી સહસ્રનામ સ્તોત્રમ્ ॥

ધ્યાનમ્

શ્રીમચ્ચન્દનચર્ચિતોજ્જ્વલવપુઃ શુક્લામ્બરા મલ્લિકા-
માલાલાલિત કુન્તલા પ્રવિલસન્મુક્તાવલીશોભના ।
સર્વજ્ઞાનનિધાનપુસ્તકધરા રુદ્રાક્ષમાલાઙ્કિતા
વાગ્દેવી વદનામ્બુજે વસતુ મે ત્રૈલોક્યમાતા શુભા ॥

શ્રીનારદ ઉવાચ -

ભગવન્પરમેશાન સર્વલોકૈકનાયક ।
કથં સરસ્વતી સાક્ષાત્પ્રસન્ના પરમેષ્ઠિનઃ ॥ ૨॥

કથં દેવ્યા મહાવાણ્યાઃ સતત્પ્રાપ સુદુર્લભમ્ ।
એતન્મે વદ તત્ત્વેન મહાયોગીશ્વરપ્રભો ॥ ૩॥

શ્રીસનત્કુમાર ઉવાચ -

સાધુ પૃષ્ટં ત્વયા બ્રહ્મન્ ગુહ્યાદ્ગુહ્ય મનુત્તમમ્ ।
ભયાનુગોપિતં યત્નાદિદાનીં સત્પ્રકાશ્યતે ॥ ૪॥

પુરા પિતામહં દૃષ્ટ્વા જગત્સ્થાવરજઙ્ગમમ્ ।
નિર્વિકારં નિરાભાસં સ્તંભીભૂતમચેતસમ્ ॥ ૫॥

સૃષ્ટ્વા ત્રૈલોક્યમખિલં વાગભાવાત્તથાવિધમ્ ।
આધિક્યાભાવતઃ સ્વસ્ય પરમેષ્ઠી જગદ્ગુરુઃ ॥ ૬॥

દિવ્યવર્ષાયુતં તેન તપો દુષ્કર મુત્તમમ્ ।
તતઃ કદાચિત્સંજાતા વાણી સર્વાર્થશોભિતા ॥ ૭॥

અહમસ્મિ મહાવિદ્યા સર્વવાચામધીશ્વરી ।
મમ નામ્નાં સહસ્રં તુ ઉપદેક્ષ્યામ્યનુત્તમમ્ ॥ ૮॥

અનેન સંસ્તુતા નિત્યં પત્ની તવ ભવામ્યહમ્ ।
ત્વયા સૃષ્ટં જગત્સર્વં વાણીયુક્તં ભવિષ્યતિ ॥ ૯॥

ઇદં રહસ્યં પરમં મમ નામસહસ્રકમ્ ।
સર્વપાપૌઘશમનં મહાસારસ્વતપ્રદમ્ ॥ ૧૦॥

મહાકવિત્વદં લોકે વાગીશત્વપ્રદાયકમ્ ।
ત્વં વા પરઃ પુમાન્યસ્તુસ્તવેનાનેન તોષયેત્ ॥ ૧૧॥

તસ્યાહં કિંકરી સાક્ષાદ્ભવિષ્યામિ ન સંશયઃ ।
ઇત્યુક્ત્વાન્તર્દધે વાણી તદારભ્ય પિતામહઃ ॥ ૧૨॥

સ્તુત્વા સ્તોત્રેણ દિવ્યેન તત્પતિત્વમવાપ્તવાન્ ।
વાણીયુક્તં જગત્સર્વં તદારભ્યાભવન્મુને ॥ ૧૩॥

તત્તેહં સંપ્રવક્ષ્યામિ શ‍ૃણુ યત્નેન નારદ ।
સાવધાનમના ભૂત્વા ક્ષણં શુદ્ધો મુનીશ્વરઃ ॥ ૧૪॥

અથ સહસ્રનામસ્તોત્રમ્ ।
ૐ વાગ્વાણી વરદા વન્દ્યા વરારોહા વરપ્રદા ।
વૃત્તિર્વાગીશ્વરી વાર્તા વરા વાગીશવલ્લભા ॥ ૧॥

વિશ્વેશ્વરી વિશ્વવન્દ્યા વિશ્વેશપ્રિયકારિણી ।
વાગ્વાદિની ચ વાગ્દેવી વૃદ્ધિદા વૃદ્ધિકારિણી ॥ ૨॥

વૃદ્ધિર્વૃદ્ધા વિષઘ્ની ચ વૃષ્ટિર્વૃષ્ટિપ્રદાયિની ।
વિશ્વારાધ્યા વિશ્વમાતા વિશ્વધાત્રી વિનાયકા ॥ ૩॥

વિશ્વશક્તિર્વિશ્વસારા વિશ્વા વિશ્વવિભાવરી ।
વેદાન્તવેદિની વેદ્યા વિત્તા વેદત્રયાત્મિકા ॥ ૪॥

વેદજ્ઞા વેદજનની વિશ્વા વિશ્વવિભાવરી ।
વરેણ્યા વાઙ્મયી વૃદ્ધા વિશિષ્ટપ્રિયકારિણી ॥ ૫॥

વિશ્વતોવદના વ્યાપ્તા વ્યાપિની વ્યાપકાત્મિકા ।
વ્યાળઘ્ની વ્યાળભૂષાંગી વિરજા વેદનાયિકા ॥ ૬॥

વેદવેદાન્તસંવેદ્યા વેદાન્તજ્ઞાનરૂપિણી ।
વિભાવરી ચ વિક્રાન્તા વિશ્વામિત્રા વિધિપ્રિયા ॥ ૭॥

વરિષ્ઠા વિપ્રકૃષ્ટા ચ વિપ્રવર્યપ્રપૂજિતા ।

વેદરૂપા વેદમયી વેદમૂર્તિશ્ચ વલ્લભા ॥ ૮॥

ગૌરી ગુણવતી ગોપ્યા ગન્ધર્વનગરપ્રિયા ।
ગુણમાતા ગુહાન્તસ્થા ગુરુરૂપા ગુરુપ્રિયા ॥ ૯॥

ગિરિવિદ્યા ગાનતુષ્ટા ગાયકપ્રિયકારિણી ।
ગાયત્રી ગિરિશારાધ્યા ગીર્ગિરીશપ્રિયંકરી ॥ ૧૦॥

ગિરિજ્ઞા જ્ઞાનવિદ્યા ચ ગિરિરૂપા ગિરીશ્વરી ।
ગીર્માતા ગણસંસ્તુત્યા ગણનીયગુણાન્વિતા ॥ ૧૧॥

ગૂઢરૂપા ગુહા ગોપ્યા ગોરૂપા ગૌર્ગુણાત્મિકા ।
ગુર્વી ગુર્વમ્બિકા ગુહ્યા ગેયજા ગૃહનાશિની ॥ ૧૨॥

ગૃહિણી ગૃહદોષઘ્ની ગવઘ્ની ગુરુવત્સલા ।
ગૃહાત્મિકા ગૃહારાધ્યા ગૃહબાધાવિનાશિની ॥ ૧૩॥

ગઙ્ગા ગિરિસુતા ગમ્યા ગજયાના ગુહસ્તુતા ।
ગરુડાસનસંસેવ્યા ગોમતી ગુણશાલિની ॥ ૧૪॥

શારદા શાશ્વતી શૈવી શાંકરી શંકરાત્મિકા ।
શ્રીઃ શર્વાણી શતઘ્ની ચ શરચ્ચન્દ્રનિભાનના ॥ ૧૫॥

શર્મિષ્ઠા શમનઘ્ની ચ શતસાહસ્રરૂપિણી ।
શિવા શમ્ભુપ્રિયા શ્રદ્ધા શ્રુતિરૂપા શ્રુતિપ્રિયા ॥ ૧૬॥

શુચિષ્મતી શર્મકરી શુદ્ધિદા શુદ્ધિરૂપિણી ।
શિવા શિવંકરી શુદ્ધા શિવારાધ્યા શિવાત્મિકા ॥ ૧૭॥

શ્રીમતી શ્રીમયી શ્રાવ્યા શ્રુતિઃ શ્રવણગોચરા ।
શાન્તિઃ શાન્તિકરી શાન્તા શાન્તાચારપ્રિયંકરી ॥ ૧૮॥

શીલલભ્યા શીલવતી શ્રીમાતા શુભકારિણી ।
શુભવાણી શુદ્ધવિદ્યા શુદ્ધચિત્તપ્રપૂજિતા ॥ ૧૯॥

શ્રીકરી શ્રુતપાપઘ્ની શુભાક્ષી શુચિવલ્લભા ।
શિવેતરઘ્ની શબરી શ્રવણીયગુણાન્વિતા ॥ ૨૦॥

શારી શિરીષપુષ્પાભા શમનિષ્ઠા શમાત્મિકા ।
શમાન્વિતા શમારાધ્યા શિતિકણ્ઠપ્રપૂજિતા ॥ ૨૧॥

શુદ્ધિઃ શુદ્ધિકરી શ્રેષ્ઠા શ્રુતાનન્તા શુભાવહા ।
સરસ્વતી ચ સર્વજ્ઞા સર્વસિદ્ધિપ્રદાયિની ॥ ૨૨॥

સરસ્વતી ચ સાવિત્રી સંધ્યા સર્વેપ્સિતપ્રદા ।
સર્વાર્તિઘ્ની સર્વમયી સર્વવિદ્યાપ્રદાયિની ॥ ૨૩॥

સર્વેશ્વરી સર્વપુણ્યા સર્ગસ્થિત્યન્તકારિણી ।
સર્વારાધ્યા સર્વમાતા સર્વદેવનિષેવિતા ॥ ૨૪॥

સર્વૈશ્વર્યપ્રદા સત્યા સતી સત્વગુણાશ્રયા ।
સ્વરક્રમપદાકારા સર્વદોષનિષૂદિની ॥ ૨૫॥

સહસ્રાક્ષી સહસ્રાસ્યા સહસ્રપદસંયુતા ।
સહસ્રહસ્તા સાહસ્રગુણાલંકૃતવિગ્રહા ॥ ૨૬॥

સહસ્રશીર્ષા સદ્રૂપા સ્વધા સ્વાહા સુધામયી ।
ષડ્ગ્રન્થિભેદિની સેવ્યા સર્વલોકૈકપૂજિતા ॥ ૨૭॥

સ્તુત્યા સ્તુતિમયી સાધ્યા સવિતૃપ્રિયકારિણી ।
સંશયચ્છેદિની સાંખ્યવેદ્યા સંખ્યા સદીશ્વરી ॥ ૨૮॥

સિદ્ધિદા સિદ્ધસમ્પૂજ્યા સર્વસિદ્ધિપ્રદાયિની ।
સર્વજ્ઞા સર્વશક્તિશ્ચ સર્વસમ્પત્પ્રદાયિની ॥ ૨૯॥

સર્વાશુભઘ્ની સુખદા સુખા સંવિત્સ્વરૂપિણી ।
સર્વસમ્ભીષણી સર્વજગત્સમ્મોહિની તથા ॥ ૩૦॥

સર્વપ્રિયંકરી સર્વશુભદા સર્વમઙ્ગળા ।
સર્વમન્ત્રમયી સર્વતીર્થપુણ્યફલપ્રદા ॥ ૩૧॥

સર્વપુણ્યમયી સર્વવ્યાધિઘ્ની સર્વકામદા ।
સર્વવિઘ્નહરી સર્વવન્દિતા સર્વમઙ્ગળા ॥ ૩૨॥

સર્વમન્ત્રકરી સર્વલક્ષ્મીઃ સર્વગુણાન્વિતા ।
સર્વાનન્દમયી સર્વજ્ઞાનદા સત્યનાયિકા ॥ ૩૩॥

સર્વજ્ઞાનમયી સર્વરાજ્યદા સર્વમુક્તિદા ।
સુપ્રભા સર્વદા સર્વા સર્વલોકવશંકરી ॥ ૩૪॥

સુભગા સુન્દરી સિદ્ધા સિદ્ધામ્બા સિદ્ધમાતૃકા ।
સિદ્ધમાતા સિદ્ધવિદ્યા સિદ્ધેશી સિદ્ધરૂપિણી ॥ ૩૫॥

સુરૂપિણી સુખમયી સેવકપ્રિયકારિણી ।
સ્વામિની સર્વદા સેવ્યા સ્થૂલસૂક્ષ્માપરામ્બિકા ॥ ૩૬॥

સારરૂપા સરોરૂપા સત્યભૂતા સમાશ્રયા ।
સિતાસિતા સરોજાક્ષી સરોજાસનવલ્લભા ॥ ૩૭॥

સરોરુહાભા સર્વાઙ્ગી સુરેન્દ્રાદિપ્રપૂજિતા ।
મહાદેવી મહેશાની મહાસારસ્વતપ્રદા ॥ ૩૮॥

મહાસરસ્વતી મુક્તા મુક્તિદા મલનાશિની ।
મહેશ્વરી મહાનન્દા મહામન્ત્રમયી મહી ॥ ૩૯॥

મહાલક્ષ્મીર્મહાવિદ્યા માતા મન્દરવાસિની ।
મન્ત્રગમ્યા મન્ત્રમાતા મહામન્ત્રફલપ્રદા ॥ ૪૦॥

મહામુક્તિર્મહાનિત્યા મહાસિદ્ધિપ્રદાયિની ।
મહાસિદ્ધા મહામાતા મહદાકારસંયુતા ॥ ૪૧॥

મહા મહેશ્વરી મૂર્તિર્મોક્ષદા મણિભૂષણા ।
મેનકા માનિની માન્યા મૃત્યુઘ્ની મેરુરૂપિણી ॥ ૪૨॥

મદિરાક્ષી મદાવાસા મખરૂપા મખેશ્વરી ।
મહામોહા મહામાયા માતૃણાં મૂર્ધ્નિસંસ્થિતા ॥ ૪૩॥

મહાપુણ્યા મુદાવાસા મહાસમ્પત્પ્રદાયિની ।
મણિપૂરૈકનિલયા મધુરૂપા મહોત્કટા ॥ ૪૪॥

મહાસૂક્ષ્મા મહાશાન્તા મહાશાન્તિપ્રદાયિની ।
મુનિસ્તુતા મોહહન્ત્રી માધવી માધવપ્રિયા ॥ ૪૫॥

મા મહાદેવસંસ્તુત્યા મહિષીગણપૂજિતા ।
મૃષ્ટાન્નદા ચ માહેન્દ્રી મહેન્દ્રપદદાયિની ॥ ૪૬॥

મતિર્મતિપ્રદા મેધા મર્ત્યલોકનિવાસિની ।
મુખ્યા મહાનિવાસા ચ મહાભાગ્યજનાશ્રિતા ॥ ૪૭॥

મહિળા મહિમા મૃત્યુહારી મેધાપ્રદાયિની ।
મેધ્યા મહાવેગવતી મહામોક્ષફલપ્રદા ॥ ૪૮॥

મહાપ્રભાભા મહતી મહાદેવપ્રિયંકરી ।

મહાપોષા મહર્દ્ધિશ્ચ મુક્તાહારવિભૂષણા ॥ ૪૯॥

માણિક્યભૂષણા મન્ત્રા મુખ્યચન્દ્રાર્ધશેખરા ।
મનોરૂપા મનઃશુદ્ધિઃ મનઃશુદ્ધિપ્રદાયિની ॥ ૫૦॥

મહાકારુણ્યસમ્પૂર્ણા મનોનમનવન્દિતા ।
મહાપાતકજાલઘ્ની મુક્તિદા મુક્તભૂષણા ॥ ૫૧॥

મનોન્મની મહાસ્થૂલા મહાક્રતુફલપ્રદા ।
મહાપુણ્યફલપ્રાપ્યા માયાત્રિપુરનાશિની ॥ ૫૨॥

મહાનસા મહામેધા મહામોદા મહેશ્વરી ।
માલાધરી મહોપાયા મહાતીર્થફલપ્રદા ॥ ૫૩॥

મહામઙ્ગળસમ્પૂર્ણા મહાદારિદ્ર્યનાશિની ।
મહામખા મહામેઘા મહાકાળી મહાપ્રિયા ॥ ૫૪॥

મહાભૂષા મહાદેહા મહારાજ્ઞી મુદાલયા ।
ભૂરિદા ભાગ્યદા ભોગ્યા ભોગ્યદા ભોગદાયિની ॥ ૫૫॥

ભવાની ભૂતિદા ભૂતિઃ ભૂમિર્ભૂમિસુનાયિકા ।
ભૂતધાત્રી ભયહરી ભક્તસારસ્વતપ્રદા ॥ ૫૬॥

ભુક્તિર્ભુક્તિપ્રદા ભેકી ભક્તિર્ભક્તિપ્રદાયિની ।
ભક્તસાયુજ્યદા ભક્તસ્વર્ગદા ભક્તરાજ્યદા ॥ ૫૭॥

ભાગીરથી ભવારાધ્યા ભાગ્યાસજ્જનપૂજિતા ।
ભવસ્તુત્યા ભાનુમતી ભવસાગરતારણી ॥ ૫૮॥

ભૂતિર્ભૂષા ચ ભૂતેશી ભાલલોચનપૂજિતા ।
ભૂતા ભવ્યા ભવિષ્યા ચ ભવવિદ્યા ભવાત્મિકા ॥ ૫૯॥

બાધાપહારિણી બન્ધુરૂપા ભુવનપૂજિતા ।
ભવઘ્ની ભક્તિલભ્યા ચ ભક્તરક્ષણતત્પરા ॥ ૬૦॥

ભક્તાર્તિશમની ભાગ્યા ભોગદાનકૃતોદ્યમા ।
ભુજઙ્ગભૂષણા ભીમા ભીમાક્ષી ભીમરૂપિણી ॥ ૬૧॥

ભાવિની ભ્રાતૃરૂપા ચ ભારતી ભવનાયિકા ।
ભાષા ભાષાવતી ભીષ્મા ભૈરવી ભૈરવપ્રિયા ॥ ૬૨॥

ભૂતિર્ભાસિતસર્વાઙ્ગી ભૂતિદા ભૂતિનાયિકા ।
ભાસ્વતી ભગમાલા ચ ભિક્ષાદાનકૃતોદ્યમા ॥ ૬૩॥

ભિક્ષુરૂપા ભક્તિકરી ભક્તલક્ષ્મીપ્રદાયિની ।
ભ્રાન્તિઘ્ના ભ્રાન્તિરૂપા ચ ભૂતિદા ભૂતિકારિણી ॥ ૬૪॥

ભિક્ષણીયા ભિક્ષુમાતા ભાગ્યવદ્દૃષ્ટિગોચરા ।
ભોગવતી ભોગરૂપા ભોગમોક્ષફલપ્રદા ॥ ૬૫॥

ભોગશ્રાન્તા ભાગ્યવતી ભક્તાઘૌઘવિનાશિની ।
બ્રાહ્મી બ્રહ્મસ્વરૂપા ચ બૃહતી બ્રહ્મવલ્લભા ॥ ૬૬॥

બ્રહ્મદા બ્રહ્મમાતા ચ બ્રહ્માણી બ્રહ્મદાયિની ।
બ્રહ્મેશી બ્રહ્મસંસ્તુત્યા બ્રહ્મવેદ્યા બુધપ્રિયા ॥ ૬૭॥

બાલેન્દુશેખરા બાલા બલિપૂજાકરપ્રિયા ।
બલદા બિન્દુરૂપા ચ બાલસૂર્યસમપ્રભા ॥ ૬૮॥

બ્રહ્મરૂપા બ્રહ્મમયી બ્રધ્નમણ્ડલમધ્યગા ।
બ્રહ્માણી બુદ્ધિદા બુદ્ધિર્બુદ્ધિરૂપા બુધેશ્વરી ॥ ૬૯॥

બન્ધક્ષયકરી બાધનાશની બન્ધુરૂપિણી ।
બિન્દ્વાલયા બિન્દુભૂષા બિન્દુનાદસમન્વિતા ॥ ૭૦॥

બીજરૂપા બીજમાતા બ્રહ્મણ્યા બ્રહ્મકારિણી ।
બહુરૂપા બલવતી બ્રહ્મજા બ્રહ્મચારિણી ॥ ૭૧॥

બ્રહ્મસ્તુત્યા બ્રહ્મવિદ્યા બ્રહ્માણ્ડાધિપવલ્લભા ।
બ્રહ્મેશવિષ્ણુરૂપા ચ બ્રહ્મવિષ્ણ્વીશસંસ્થિતા ॥ ૭૨॥

બુદ્ધિરૂપા બુધેશાની બન્ધી બન્ધવિમોચની ।
અક્ષમાલાક્ષરાકારાક્ષરાક્ષરફલપ્રદા ॥ ૭૩॥

અનન્તાનન્દસુખદાનન્તચન્દ્રનિભાનના ।
અનન્તમહિમાઘોરાનન્તગમ્ભીરસમ્મિતા ॥ ૭૪॥

અદૃષ્ટાદૃષ્ટદાનન્તાદૃષ્ટભાગ્યફલપ્રદા ।
અરુન્ધત્યવ્યયીનાથાનેકસદ્ગુણસંયુતા ॥ ૭૫॥

અનેકભૂષણાદૃશ્યાનેકલેખનિષેવિતા ।
અનન્તાનન્તસુખદાઘોરાઘોરસ્વરૂપિણી ॥ ૭૬॥

અશેષદેવતારૂપામૃતરૂપામૃતેશ્વરી ।
અનવદ્યાનેકહસ્તાનેકમાણિક્યભૂષણા ॥ ૭૭॥

અનેકવિઘ્નસંહર્ત્રી હ્યનેકાભરણાન્વિતા ।
અવિદ્યાજ્ઞાનસંહર્ત્રી હ્યવિદ્યાજાલનાશિની ॥ ૭૮॥

અભિરૂપાનવદ્યાઙ્ગી હ્યપ્રતર્ક્યગતિપ્રદા ।
અકળંકારૂપિણી ચ હ્યનુગ્રહપરાયણા ॥ ૭૯॥

અમ્બરસ્થામ્બરમયામ્બરમાલામ્બુજેક્ષણા ।
અમ્બિકાબ્જકરાબ્જસ્થાંશુમત્યંશુશતાન્વિતા ॥ ૮૦॥

અમ્બુજાનવરાખણ્ડામ્બુજાસનમહાપ્રિયા ।
અજરામરસંસેવ્યાજરસેવિતપદ્યુગા ॥ ૮૧॥

અતુલાર્થપ્રદાર્થૈક્યાત્યુદારાત્વભયાન્વિતા ।
અનાથવત્સલાનન્તપ્રિયાનન્તેપ્સિતપ્રદા ॥ ૮૨॥

અમ્બુજાક્ષ્યમ્બુરૂપામ્બુજાતોદ્ભવમહાપ્રિયા ।
અખણ્ડાત્વમરસ્તુત્યામરનાયકપૂજિતા ॥ ૮૩॥

અજેયાત્વજસંકાશાજ્ઞાનનાશિન્યભીષ્ટદા ।
અક્તાઘનેના ચાસ્ત્રેશી હ્યલક્ષ્મીનાશિની તથા ॥ ૮૪॥

અનન્તસારાનન્તશ્રીરનન્તવિધિપૂજિતા ।
અભીષ્ટામર્ત્યસમ્પૂજ્યા હ્યસ્તોદયવિવર્જિતા ॥ ૮૫॥

આસ્તિકસ્વાન્તનિલયાસ્ત્રરૂપાસ્ત્રવતી તથા ।
અસ્ખલત્યસ્ખલદ્રૂપાસ્ખલદ્વિદ્યાપ્રદાયિની ॥ ૮૬॥

અસ્ખલત્સિદ્ધિદાનન્દામ્બુજાતામરનાયિકા ।
અમેયાશેષપાપઘ્ન્યક્ષયસારસ્વતપ્રદા ॥ ૮૭॥

જયા જયન્તી જયદા જન્મકર્મવિવર્જિતા ।
જગત્પ્રિયા જગન્માતા જગદીશ્વરવલ્લભા ॥ ૮૮॥

જાતિર્જયા જિતામિત્રા જપ્યા જપનકારિણી ।
જીવની જીવનિલયા જીવાખ્યા જીવધારિણી ॥ ૮૯॥

જાહ્નવી જ્યા જપવતી જાતિરૂપા જયપ્રદા ।

જનાર્દનપ્રિયકરી જોષનીયા જગત્સ્થિતા ॥ ૯૦॥

જગજ્જ્યેષ્ઠા જગન્માયા જીવનત્રાણકારિણી ।
જીવાતુલતિકા જીવજન્મી જન્મનિબર્હણી ॥ ૯૧॥

જાડ્યવિધ્વંસનકરી જગદ્યોનિર્જયાત્મિકા ।
જગદાનન્દજનની જમ્બૂશ્ચ જલજેક્ષણા ॥ ૯૨॥

જયન્તી જઙ્ગપૂગઘ્ની જનિતજ્ઞાનવિગ્રહા ।
જટા જટાવતી જપ્યા જપકર્તૃપ્રિયંકરી ॥ ૯૩॥

જપકૃત્પાપસંહર્ત્રી જપકૃત્ફલદાયિની ।
જપાપુષ્પસમપ્રખ્યા જપાકુસુમધારિણી ॥ ૯૪॥

જનની જન્મરહિતા જ્યોતિર્વૃત્યભિદાયિની ।
જટાજૂટનચન્દ્રાર્ધા જગત્સૃષ્ટિકરી તથા ॥ ૯૫॥

જગત્ત્રાણકરી જાડ્યધ્વંસકર્ત્રી જયેશ્વરી ।
જગદ્બીજા જયાવાસા જન્મભૂર્જન્મનાશિની ॥ ૯૬॥

જન્માન્ત્યરહિતા જૈત્રી જગદ્યોનિર્જપાત્મિકા ।
જયલક્ષણસમ્પૂર્ણા જયદાનકૃતોદ્યમા ॥ ૯૭॥

જમ્ભરાદ્યાદિસંસ્તુત્યા જમ્ભારિફલદાયિની ।
જગત્ત્રયહિતા જ્યેષ્ઠા જગત્ત્રયવશંકરી ॥ ૯૮॥

જગત્ત્રયામ્બા જગતી જ્વાલા જ્વાલિતલોચના ।
જ્વાલિની જ્વલનાભાસા જ્વલન્તી જ્વલનાત્મિકા ॥ ૯૯॥

જિતારાતિસુરસ્તુત્યા જિતક્રોધા જિતેન્દ્રિયા ।
જરામરણશૂન્યા ચ જનિત્રી જન્મનાશિની ॥ ૧૦૦॥

જલજાભા જલમયી જલજાસનવલ્લભા ।
જલજસ્થા જપારાધ્યા જનમઙ્ગળકારિણી ॥ ૧૦૧॥

કામિની કામરૂપા ચ કામ્યા કામપ્રદાયિની ।
કમૌળી કામદા કર્ત્રી ક્રતુકર્મફલપ્રદા ॥ ૧૦૨॥

કૃતઘ્નઘ્ની ક્રિયારૂપા કાર્યકારણરૂપિણી ।
કઞ્જાક્ષી કરુણારૂપા કેવલામરસેવિતા ॥ ૧૦૩॥

કલ્યાણકારિણી કાન્તા કાન્તિદા કાન્તિરૂપિણી ।
કમલા કમલાવાસા કમલોત્પલમાલિની ॥ ૧૦૪॥

કુમુદ્વતી ચ કલ્યાણી કાન્તિઃ કામેશવલ્લભા ।
કામેશ્વરી કમલિની કામદા કામબન્ધિની ॥ ૧૦૫॥

કામધેનુઃ કાઞ્ચનાક્ષી કાઞ્ચનાભા કળાનિધિઃ ।
ક્રિયા કીર્તિકરી કીર્તિઃ ક્રતુશ્રેષ્ઠા કૃતેશ્વરી ॥ ૧૦૬॥

ક્રતુસર્વક્રિયાસ્તુત્યા ક્રતુકૃત્પ્રિયકારિણી ।
ક્લેશનાશકરી કર્ત્રી કર્મદા કર્મબન્ધિની ॥ ૧૦૭॥

કર્મબન્ધહરી કૃષ્ટા ક્લમઘ્ની કઞ્જલોચના ।
કન્દર્પજનની કાન્તા કરુણા કરુણાવતી ॥ ૧૦૮॥

ક્લીંકારિણી કૃપાકારા કૃપાસિન્ધુઃ કૃપાવતી ।
કરુણાર્દ્રા કીર્તિકરી કલ્મષઘ્ની ક્રિયાકરી ॥ ૧૦૯॥

ક્રિયાશક્તિઃ કામરૂપા કમલોત્પલગન્ધિની ।
કળા કળાવતી કૂર્મી કૂટસ્થા કઞ્જસંસ્થિતા ॥ ૧૧૦॥

કાળિકા કલ્મષઘ્ની ચ કમનીયજટાન્વિતા ।
કરપદ્મા કરાભીષ્ટપ્રદા ક્રતુફલપ્રદા ॥ ૧૧૧॥

કૌશિકી કોશદા કાવ્યા કર્ત્રી કોશેશ્વરી કૃશા ।
કૂર્મયાના કલ્પલતા કાલકૂટવિનાશિની ॥ ૧૧૨॥

કલ્પોદ્યાનવતી કલ્પવનસ્થા કલ્પકારિણી ।
કદમ્બકુસુમાભાસા કદમ્બકુસુમપ્રિયા ॥ ૧૧૩॥

કદમ્બોદ્યાનમધ્યસ્થા કીર્તિદા કીર્તિભૂષણા ।
કુલમાતા કુલાવાસા કુલાચારપ્રિયંકરી ॥ ૧૧૪॥

કુલાનાથા કામકળા કળાનાથા કળેશ્વરી ।
કુન્દમન્દારપુષ્પાભા કપર્દસ્થિતચન્દ્રિકા ॥ ૧૧૫॥

કવિત્વદા કાવ્યમાતા કવિમાતા કળાપ્રદા ।
તરુણી તરુણીતાતા તારાધિપસમાનના ॥ ૧૧૬॥

તૃપ્તિસ્તૃપ્તિપ્રદા તર્ક્યા તપની તાપિની તથા ।
તર્પણી તીર્થરૂપા ચ ત્રિદશા ત્રિદશેશ્વરી ॥ ૧૧૭॥

ત્રિદિવેશી ત્રિજનની ત્રિમાતા ત્ર્યમ્બકેશ્વરી ।
ત્રિપુરા ત્રિપુરેશાની ત્ર્યમ્બકા ત્રિપુરામ્બિકા ॥ ૧૧૮॥

ત્રિપુરશ્રીસ્ત્રયીરૂપા ત્રયીવેદ્યા ત્રયીશ્વરી ।
ત્રય્યન્તવેદિની તામ્રા તાપત્રિતયહારિણી ॥ ૧૧૯॥

તમાલસદૃશી ત્રાતા તરુણાદિત્યસન્નિભા ।
ત્રૈલોક્યવ્યાપિની તૃપ્તા તૃપ્તિકૃત્તત્ત્વરૂપિણી ॥ ૧૨૦॥

તુર્યા ત્રૈલોક્યસંસ્તુત્યા ત્રિગુણા ત્રિગુણેશ્વરી ।
ત્રિપુરઘ્ની ત્રિમાતા ચ ત્ર્યમ્બકા ત્રિગુણાન્વિતા ॥ ૧૨૧॥

તૃષ્ણાચ્છેદકરી તૃપ્તા તીક્ષ્ણા તીક્ષ્ણસ્વરૂપિણી ।
તુલા તુલાદિરહિતા તત્તદ્બ્રહ્મસ્વરૂપિણી ॥ ૧૨૨॥

ત્રાણકર્ત્રી ત્રિપાપઘ્ની ત્રિપદા ત્રિદશાન્વિતા ।
તથ્યા ત્રિશક્તિસ્ત્રિપદા તુર્યા ત્રૈલોક્યસુન્દરી ॥ ૧૨૩॥

તેજસ્કરી ત્રિમૂર્ત્યાદ્યા તેજોરૂપા ત્રિધામતા ।
ત્રિચક્રકર્ત્રી ત્રિભગા તુર્યાતીતફલપ્રદા ॥ ૧૨૪॥

તેજસ્વિની તાપહારી તાપોપપ્લવનાશિની ।
તેજોગર્ભા તપઃસારા ત્રિપુરારિપ્રિયંકરી ॥ ૧૨૫॥

તન્વી તાપસસંતુષ્ટા તપનાઙ્ગજભીતિનુત્ ।
ત્રિલોચના ત્રિમાર્ગા ચ તૃતીયા ત્રિદશસ્તુતા ॥ ૧૨૬॥

ત્રિસુન્દરી ત્રિપથગા તુરીયપદદાયિની ।
શુભા શુભાવતી શાન્તા શાન્તિદા શુભદાયિની ॥ ૧૨૭॥

શીતળા શૂલિની શીતા શ્રીમતી ચ શુભાન્વિતા ।
યોગસિદ્ધિપ્રદા યોગ્યા યજ્ઞેનપરિપૂરિતા ॥ ૧૨૮॥

યજ્યા યજ્ઞમયી યક્ષી યક્ષિણી યક્ષિવલ્લભા ।
યજ્ઞપ્રિયા યજ્ઞપૂજ્યા યજ્ઞતુષ્ટા યમસ્તુતા ॥ ૧૨૯॥

યામિનીયપ્રભા યામ્યા યજનીયા યશસ્કરી ।
યજ્ઞકર્ત્રી યજ્ઞરૂપા યશોદા યજ્ઞસંસ્તુતા ॥ ૧૩૦॥

યજ્ઞેશી યજ્ઞફલદા યોગયોનિર્યજુસ્તુતા ।

યમિસેવ્યા યમારાધ્યા યમિપૂજ્યા યમીશ્વરી ॥ ૧૩૧॥

યોગિની યોગરૂપા ચ યોગકર્તૃપ્રિયંકરી ।
યોગયુક્તા યોગમયી યોગયોગીશ્વરામ્બિકા ॥ ૧૩૨॥

યોગજ્ઞાનમયી યોનિર્યમાદ્યષ્ટાઙ્ગયોગતા ।
યન્ત્રિતાઘૌઘસંહારા યમલોકનિવારિણી ॥ ૧૩૩॥

યષ્ટિવ્યષ્ટીશસંસ્તુત્યા યમાદ્યષ્ટાઙ્ગયોગયુક્ ।
યોગીશ્વરી યોગમાતા યોગસિદ્ધા ચ યોગદા ॥ ૧૩૪॥

યોગારૂઢા યોગમયી યોગરૂપા યવીયસી ।
યન્ત્રરૂપા ચ યન્ત્રસ્થા યન્ત્રપૂજ્યા ચ યન્ત્રિતા ॥ ૧૩૫॥

યુગકર્ત્રી યુગમયી યુગધર્મવિવર્જિતા ।
યમુના યમિની યામ્યા યમુનાજલમધ્યગા ॥ ૧૩૬॥

યાતાયાતપ્રશમની યાતનાનાન્નિકૃન્તની ।
યોગાવાસા યોગિવન્દ્યા યત્તચ્છબ્દસ્વરૂપિણી ॥ ૧૩૭॥

યોગક્ષેમમયી યન્ત્રા યાવદક્ષરમાતૃકા ।
યાવત્પદમયી યાવચ્છબ્દરૂપા યથેશ્વરી ॥ ૧૩૮॥

યત્તદીયા યક્ષવન્દ્યા યદ્વિદ્યા યતિસંસ્તુતા ।
યાવદ્વિદ્યામયી યાવદ્વિદ્યાવૃન્દસુવન્દિતા ॥ ૧૩૯॥

યોગિહૃત્પદ્મનિલયા યોગિવર્યપ્રિયંકરી ।
યોગિવન્દ્યા યોગિમાતા યોગીશફલદાયિની ॥ ૧૪૦॥

યક્ષવન્દ્યા યક્ષપૂજ્યા યક્ષરાજસુપૂજિતા ।
યજ્ઞરૂપા યજ્ઞતુષ્ટા યાયજૂકસ્વરૂપિણી ॥ ૧૪૧॥

યન્ત્રારાધ્યા યન્ત્રમધ્યા યન્ત્રકર્તૃપ્રિયંકરી ।
યન્ત્રારૂઢા યન્ત્રપૂજ્યા યોગિધ્યાનપરાયણા ॥ ૧૪૨॥

યજનીયા યમસ્તુત્યા યોગયુક્તા યશસ્કરી ।
યોગબદ્ધા યતિસ્તુત્યા યોગજ્ઞા યોગનાયકી ॥ ૧૪૩॥

યોગિજ્ઞાનપ્રદા યક્ષી યમબાધાવિનાશિની ।
યોગિકામ્યપ્રદાત્રી ચ યોગિમોક્ષપ્રદાયિની ॥ ૧૪૪॥

ઇતિ નામ્નાં સરસ્વત્યાઃ સહસ્રં સમુદીરિતમ્ ।
મન્ત્રાત્મકં મહાગોપ્યં મહાસારસ્વતપ્રદમ્ ॥ ૧॥

યઃ પઠેચ્છૃણુયાદ્ભક્ત્યા ત્રિકાલં સાધકઃ પુમાન્ ।
સર્વવિદ્યાનિધિઃ સાક્ષાત્ સ એવ ભવતિ ધ્રુવમ્ ॥ ૨॥

લભતે સંપદઃ સર્વાઃ પુત્રપૌત્રાદિસંયુતાઃ ।
મૂકોઽપિ સર્વવિદ્યાસુ ચતુર્મુખ ઇવાપરઃ ॥ ૩॥

ભૂત્વા પ્રાપ્નોતિ સાન્નિધ્યં અન્તે ધાતુર્મુનીશ્વર ।
સર્વમન્ત્રમયં સર્વવિદ્યામાનફલપ્રદમ્ ॥ ૪॥

મહાકવિત્વદં પુંસાં મહાસિદ્ધિપ્રદાયકમ્ ।
કસ્મૈચિન્ન પ્રદાતવ્યં પ્રાણૈઃ કણ્ઠગતૈરપિ ॥ ૫॥

મહારહસ્યં સતતં વાણીનામસહસ્રકમ્ ।
સુસિદ્ધમસ્મદાદીનાં સ્તોત્રં તે સમુદીરિતમ્ ॥ ૬॥

॥ ઇતિ શ્રીસ્કાન્દપુરાણાન્તર્ગત
સનત્કુમાર સંહિતાયાં નારદ સનત્કુમાર સંવાદે
સરસ્વતીસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Kirk Wortman kirkwort@hotmail.com

---

*shrI mahAsarasvatI sahasranAma stotram*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*